# श्रीशिवाष्टोत्तरशतदिव्यनामामृत स्तोत्रम्

**विनियोग :**

श्रीशिवाष्टोत्तरशतदिव्यनामस्तोत्रस्य नारायणऋषिः ।

अनुष्टुप्छन्दः । श्रीसदाशिवः परमात्मा देवता । गौरी उमा शक्तिः ।

श्री भगवान सदाशिवप्रीत्यर्थे पाठे विनियोगः ॥

**ध्यानम् :**

शान्ताकारं शिखरिशयनं नीलकण्ठं सुरेशं

विश्वधारं स्फटिकसदृशं शुभ्रवर्णं शुभाङ्गम् ।

गौरीकान्तं त्रितयनयनं योगिभिर्ध्यानगम्यं

वन्दे शम्भुं भवभयहरं सर्वलोकैकनाथम् ॥

**स्तोत्र पाठ आरम्भ :**

शिवो महेश्वरश्शम्भुः पिनाकी शशिशेखरः ।

वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १॥

शङ्करश्शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ।

शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥ २॥

भवश्शर्वस्त्रिलोकेशश्शितिकण्ठश्शिवाप्रियः ।

उग्रः कपाली कामारिरन्धकासुरसूदनः ॥ ३॥

गङ्गाधरो ललाटाक्षः कालकालः कृपानिधिः ।

भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४॥

कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।

वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ॥ ५॥



स्वामी रुपेश्वरानंद आश्रम

सामप्रियस्स्वरमयस्त्रयीमूर्तिरनीश्वरः ।

सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥ ६॥

हविर्यज्ञमयस्सोमः पञ्चवक्त्रस्सदाशिवः ।

विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥ ७॥

हिरण्यरेता दुर्धर्षः गिरीशो गिरिशोऽनघः ।

भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८॥

कृत्तिवासा पुरारातिर्भगवान् प्रमथाधिपः ।

मृत्युञ्जयस्सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥ ९॥

व्योमकेशो महासेनजनकश्चारुविक्रमः ।

रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः ॥ १०॥

अष्टमूर्तिरनेकात्मा सात्त्विकश्शुद्धविग्रहः ।

शाश्वतः खण्डपरशुरजः पाशविमोचकः ॥ ११॥

मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ।

पूषादन्तभिदव्यग्रो दक्षाध्वरहरो हरः ॥ १२॥

भगनेत्रभिदव्यक्तो सहस्राक्षस्सहस्रपात् ।

अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ॥ १३॥

स्तोत्र पाठ समाप्त, संदर्भ : श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः १३ । २०३-२१५ ॥

**द्वारा,**

**स्वामी रुपेश्वरानंद आश्रम, बलुआघाट, जिला - चंदौली - वाराणसी ( उत्तर प्रदेश ) - 232109**

**Mo. No.: +91 -7607 233 230 ; Email : swamirupeshwar@gmail.com**



स्वामी रुपेश्वरानंद आश्रम

फलश्रुतिः ।

एतदष्टोत्तरं नाम्नां शतमाम्नायसंमितम् ।

शङ्करस्य प्रिया गौरी जप्त्वा शम्भुप्रसाददम् ॥ १॥

त्रैकाल्यमन्वहं देवी वर्षमेकं प्रयत्नतः ।

अवाप सा शरीरार्धं प्रसादाच्छूलपाणिनः ॥ २॥

यस्त्रिसन्ध्यं पठेन्नित्यं नाम्नामष्टोत्तरं शतम् ।

शतरुद्रत्रिरावृत्या यत्फलं लभते नरः ॥ ३॥

तत्फलं प्राप्नुयान्नित्यमेकावृत्त्या नसंशयः ।

सकृद्वा नामभिः पूज्य कुलकोटिं समुद्धरेत् ॥ ४॥

बिल्वपत्रैः प्रशस्तैश्च पुष्पैश्च तुलसीदलैः ।

तिलाक्षतैर्यजेद्यस्तु जीवन्मुक्तो न संशयः ॥ ५॥

नाम्नामेषां पशुपतेरेकमेवापवर्गदम् ।

अन्येषां चावशिष्टाना फलं वक्तुं न शक्यते ॥ ६॥

इति श्रीशिवाष्टोत्तरशतदिव्यनामामृत स्तोत्रम् महिमा

संशोधितः

**द्वारा,**

**स्वामी रुपेश्वरानंद आश्रम,**

**बलुआघाट, जिला - चंदौली - वाराणसी ( उत्तर प्रदेश ) - 232109**

**Mo. No.: +91 -7607 233 230 ; Email : swamirupeshwar@gmail.com**

स्वामी रुपेश्वरानंद आश्रम